# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – साहित्यम् | **CE-3.6.11** | समयः - ११ तः २ |
| दिनाङ्कः – २५/४/२०१६ | सन्दर्भग्रन्थः – साहित्यदर्पण (परिच्छेद ८-९-१०) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** | ०८ |
| | (१) क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।<br>अन्यथोक्त गुणेष्वस्य अन्तः पातो यथायथम् ॥<br>(२) अर्थव्यक्तिः स्वभावोक्त्यालङ्कारेण तथा पुनः ।<br>रसध्वनि गुणीभूतव्यङ्ग्यानां कान्तिनामकः ॥<br>(३) क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः । | |
| **प्रश्नः -२** | **अधोलिखित कस्यचिदेकस्य उत्तरं लिखत ।** | ०८ |
| | (१) गुणालङ्कारयोः भेदप्रदर्शनपूर्वकं गुणं लक्षणं प्रतिपाद्यताम् ।<br>(२) रीतिः कतिविधा ? किञ्च तासां लक्षणम् ? सोदाहरणं प्रतिपादयत ? | |
| **प्रश्नः -३** | **द्वयोः टिप्पणीं लेख्या ।** | ०४ |
| | (१) ओजगुणः (२) लाटीरीतिः (३) गुणलक्षणम् (४) पाञ्चालीरीतिः | |
| **प्रश्नः - ४** | **अतिलघूत्तराणि लेख्यानि । (केवलं पञ्चैव )** | ०५ |
| | (१) साहित्यदर्पणे कति परिच्छेदाः सन्ति ?<br>(२) साहित्यदर्पणस्य कर्ता कः ?<br>(३) विश्वनाथमतेन कति गुणाः ?<br>(४) अष्टमपरिच्छेदे कति कारिका सन्ति ?<br>(५) अष्टमपरिच्छेदे कति कारिका सन्ति ?<br>(६) अष्टमपरिच्छेदस्य नाम किम् ?<br>(७) "लताकुञ्जं गुञ्जन्" इति कस्योदाहरणम् ?<br>(८) नवमपरिच्छेदे कस्य विवेचनमस्ति ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां लिखत ।** | ०८ |
| | (१) अनुप्रासः शब्दसाम्यं वैषम्योऽपि स्वरस्य यत् ।<br>छेकोव्यञ्जं सङ्घस्य सकृत्साम्यमनेकधा ॥<br>(२) दृश्यन्ते स्वचिदारोव्याः श्लिष्टाः साङ्गेऽपि रूपके ।<br>(३) प्रकृतं प्रतिपिध्यान्यस्थापनं स्यादपह्नुतिः ॥ | |
| **प्रश्नः -६** | साहित्यदर्पणानुसारेण उपमालङ्कारस्य भेदाः सोदाहरणं लिखत ।<br>अथवा | ०८ |

| | | |
|---|---|---|
| | विभावना-विशेषोक्तिः मध्ये भेदं प्रदर्श्य सोदाहरणं लिखतु । | |
| **प्रश्नः -७** | **द्वयोः टिप्पणी लेख्या ।** | ०४ |
| | (१) लाटानुप्रासः (२) रूपकम् (३) उत्प्रेक्षा (४) अनन्वयः | |
| **प्रश्नः -८** | **अधोलिखितेषु एकैकवाक्येन उत्तरं ददातु । (पञ्चैव)** | ०५ |
| | (१) छेकानुप्रासस्य का वृत्तिः ?<br>(२) केशः काशास्तबक विकासः इति कस्योदाहरणम् ?<br>(३) सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः । अत्र श्लेषो अस्ति न वा ?<br>(४) शब्दश्लेषस्य कति भेदाः ?<br>(५) किम् यमकम् ?<br>(६) अपह्नुतेः का वृत्तिः ?<br>(७) उत्प्रेक्षायाः कति भेदाः ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) समासोक्तिः समैर्यत्रकार्यलिङ्गविशेषणैः ।<br>व्यवहार समारोपः प्रकृतेऽन्यस्य वस्तुनः ॥<br>(२) पूर्वं पूर्वं प्रति कारणत्वेन परं परम् ।<br>स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा ॥<br>(३) अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।<br>सन्धिग्धत्वे च भवति सङ्करास्त्रिविधः पुनः ॥ | |
| **प्रश्नः -१०** | **कस्यचिदेकस्य उत्तरं ददातु ।** | ०८ |
| | (१) निदर्शना-दृष्टान्तयोः मध्ये भेदं प्रदर्श्य सोदाहरणं प्रस्तूयत।<br>(२) सङ्कर-संसृष्टिः मध्ये भेदं कृत्वा सोदाहरणं लिखत । | |
| **प्रश्नः -११** | **टिप्पणी कार्या । (एकस्य)** | ०२ |
| | (१) विरोधः (२) कारणमाला | |
| **प्रश्नः -१२** | **अतिसंक्षेपेण द्वयोः उतरं ददातु ।** | ०२ |
| | (१) विरोधालङ्कारस्य का वृत्तिः ?<br>(२) "न तज्जलं यन्न सुचारुपङ्कजम्" इति कस्योदाहरणम् ?<br>(३) संसृष्टि-अलङ्कारस्य का वृत्तिः ?<br>(४) दशमपरिच्छेदे कति अलङ्काराः सन्ति ? | |

***